# वैदिकभाषा-विषयिणी



## एका लघ्वी जिज्ञासा

**आचार्यः डॉ. नारायणशास्त्री काङ्करः**

देश-विदेशयोः समस्त-वैदिक-विभूति-श्रीपाद-पद्मेषु सादरं सविनयं च वन्दन-प्रसूनाञ्जलिं समर्प्य लघ्वीम् एकां स्वकीयां जिज्ञासां समाधातुं प्रस्तोमि अत्र-

वैदिकभाषा संस्कृतभाषातः भिन्ना वर्त्तते । संस्कृतभाषावत् कुत्र अपि वैदिकभाषा नैव शिक्ष्यते। केवलं वेदानां पठन पाठनं सर्वत्र क्रियते कार्यते च घनपाठ-जटापाठ-विकृतिपाठ-प्रभृतिरूपे तत्प्रचलनं वरीवर्त्ति । वेद-विषयस्य मध्यमा-शास्त्र्याचार्य-परीक्षाः तत्तद्-विश्वविद्यालयैः गृह्यन्ते । किन्तु आसु परीक्षासु प्रश्नानां भाषा तथा प्रश्नानाम् उत्तरदानस्य भाषा वैदिकभाषा न भूत्वा अन्या एव भाषा भवति। समये समये वेदसम्मेलनानि अपि आयोज्यन्ते एव । परन्तु एषु अपि मञ्चस्य महापुरुषाणाम् अभिभाषणानि वैदिकभाषायां नैव भवति ।

एवम् एव वैदिक-सङ्गोष्ठीषु वेदविषयेषु पठ्यमानानि शोधपत्राणि अपि वैदिकभाषायां न पठिता अन्यासु एव भाषासु पठ्यन्ते । वैदिकभाषायां काचित् पत्रपत्रिका अपि कुतश्चित् प्रकाश्यमाना नैव दृश्यते । वैदिकभाषायां गद्ये पद्ये वा रचनां कुर्वाण अपि कश्चन नैव दृष्टिगोचरः भवति ।

वेदाचार्याः अपि परस्परं वैदिकभाषायां न कदापि वार्तालापं कुर्वन्ति, न पत्राचारम् एव ते वैदिकभाषायाम् अनुतिष्ठन्ति । आकाशवाण्याः दूरदर्शनस्य च कार्यक्रमेषु वैदिकभाषायाः उपयोगस्य वार्ता तु बहु-सुदूरे अस्ति। इयम् एव दुःस्थितिः चित्रपट -जगतः विषये अपि माननीया। महद् आश्चर्यं बोभवीति, विना वैदिकभाषा -ज्ञानं वेदविषयेषु चर्चां जनाः कस्मिन् आधारे कुर्वन्ति ? वेदेषु इदं लिखितम् अस्ति तद् लिखितम् इत्यादिरूपे वेदानां गुणान् वैदिकेतर-भाषया गायन्तः अपि जनाः न कदापि विश्राम्यन्ति ।

वैदिकभाषायाः कवि-सम्मेलनानि अपि क्वचित् आयोजितानि नहि श्रुतानि। वैदिकभाषया रचितस्य साहित्यस्य पुरस्कारार्थम् आयोजिताः स्पर्धाः अपि दृष्टिपथं नैवं आयाताः।

विना वैदिकभाषा-ज्ञानम् अपि ये जनाः वेदानां वार्त्ताः कुर्वन्ति, अहं तु मन्ये ते 'अटकल द्वारा कृताः वेदमन्त्राणाम् अर्थाः एकसमानाः न भूत्वा अनेके अजायन्त, यथा सायणभाष्यम् उव्वटभाष्यम्

महीधरभाष्यम् दयानन्दभाष्यम् इत्यादिरूपे । वैदिकभाषायाः वास्तविक-ज्ञाता तु वेदमन्त्राणाम् एकम् एव अर्थं करिष्यति, अनेकान् अर्थात् नहि ।

अहं मां वैदिकभाषां शिक्षयितुं नैक-वैदिक-विद्वद्भिः सम्पर्कं साधितवान् । किन्तु कश्चित् अपि एतदर्थम् उद्यतः एव न समजायत, सञ्जायेत अपि कथम् ? सः स्वयम् एवं वैदिकभाषां नैव जानाति वेदमन्त्राणां यम् अर्थं सः करोति, तं तु स्वकीयेन अटकलेन करोति अथवा पूर्वचर्चित-भाष्याणाम् आधारेण करोति ।

विना व्याकरण-सहायतां काचित् अपि अज्ञाता अथवा दैनिक-व्यवहारे अप्रचलिता भाषा कदापि केनापि प्रकारेण न शिक्षितुं शक्यते न च शिक्षयितुम् एव शक्यते -इदं सवर्था सदा निर्विवादं सत्यसिद्धम् अस्ति । अहं वैदिकभाषा-शिक्षकं व्याकरणस्य ईदृशं पुस्तकम् अमिलषामि, यथा संस्कृतभाषां शिक्षयितुं पाणिनीयं व्याकरणम्  एवं अन्याय भाषासु लिखिताति व्याकरणस्य नैकानि असंङ्ख्यानि पुस्तकानि उपलभ्यन्ते । पाणिनीय-व्याकरणस्य यथा शब्दरूपावलिः धातुरूपावलिः च पुस्तकरूपे सुलभ्येते, तथा एव वैदिकशब्दरूपावलिः वैदिकधातुरूपावलिः च मया पुस्तकरूपे  अभिलष्येते ।

पाणिनीय-व्याकरणं यथा शब्दानां धातूनां च रूपाणि निर्मातुं विधिं दर्शयति, तथा एव वैदिक-शब्द-धातूनां रूपाणां निर्माणस्य विधेः दर्शकं वैदिक-व्याकरणम् अहं वाञ्छामि । पाणिनीय-व्याकरणं यथा धातुभिः कृत्य-कृत् प्रत्ययान्  संयोज्य प्रत्ययान् योजयित्वा नवीनार्थ-द्योतकानां शब्दानां निर्माणस्य रीतिम् उल्लिखति, तत्प्रकार-दर्शकम् एवं वैदिक -व्याकरणम् अहं प्राप्तुम्  अभिलषामि। वैदिकशब्दरूपावलिः तथा भवतु यत्र त्रिषु लिङ्गेषु सप्तसु विभक्तिषु त्रिसु वचनेषु च शब्दानां रूपाणि दत्तानि स्युः।

एवम् एव वैदिकधातुरूपावलिः अपि तथा एव भवेत्-यत्र दशगणीय-धातूनां रूपाणि दशसु लकारेषु त्रिसु पुरुषेषु त्रिषु वचनेषु च भवेयुः । एषां सर्वेषाम् अपि धातूनां-ण्यन्त-सन्नन्त-यङ्गन्त-यङ्लुगन्त-प्रक्रियासु अपि रूपाणि वैदिकधातुरूपावल्यां दशसु लकारेषु त्रिषु पुरुषेषु त्रिषु वचनेषु च स्युः एव । सब एव अत्र वैदिकधातुरूपावल्याम् अपि सर्वेषाम् एव धातूनां रूपाणि भाववाच्ये कर्मवाच्ये अपि दशसु लकारेषु त्रिषु पुरुषेषु त्रिषु वचनेषु च मया अभिलस्यन्ते।

परस्मैपदि-धातुभ्यः आत्मनेपदि -धातुभ्यः च पूर्वं यथा उपसर्ग-विशेषस्य संयोजनेन संस्कृते तेषां धातूनां पदस्य परिवर्तनं दर्शयितुं पाणिनीय-व्याकरणे परस्मैपद-प्रक्रिया आत्मनेपद-प्रक्रिया च वर्तते, तथा एवं वैदिकव्याकरणे अपि इमे द्वे प्रक्रिये मया अपेक्ष्यते ।

पाणिनि-धातुपाठवत् एव अहं वैदिक-धातुपाठम् अर्थ-सहितं कामये ।

इयत्-सर्वबोधक-व्याकरणज्ञानं विना वैदिकभाषायां समपेक्षित-अधिकारः सर्वथा असम्भवः एव अस्ति ।

यदि एवं कथ्येत वेद-ज्ञानाय प्रत्येकवेदस्य प्रातिशाख्यं व्याकरणं पूर्वत वर्त्तते एवं, तर्हि एतेन तु मम अपरा एका जिज्ञासा अपि समजायत यत् किं वैदिकभाषा चतुर्विद्या? येन तज्ज्ञानार्थं प्रत्येकवेदकृते पृथक् पृथक् प्रातिशाख्यनिर्माणम् आवश्यकम्  अभूत् ?

मम लघु-दृष्टौ तु एतानि प्रातिखाश्यानि अपि वैदिकभाषां शिक्षयितुं तावत् नैव क्षमन्ते, यावत् संस्कृतभाषां शिक्षयितुं पाणिनीयव्याकरणस्य सन्धिप्रकरण-षड्लिङ्ग-प्रकरण-दशगणीय धातु-प्रकरणानि, तेषां धातूनां ण्यन्त, सन्नान्त-यङन्त यङ्लुगन्त-नामधातु-प्रकरणैः सह विभक्त्यर्थ-कृदन्त-समास-तद्धित-स्त्रीप्रत्यय-प्रकरणानि क्षमन्ते ।

एवम् एव संस्कृतस्य अमरकोष-हलायुधकोष-विश्वकोष-मेदिनीकोषादिवत् पद्यबद्ध-वैदिकशब्दकोषान् अपि अहं भृशम् अपेक्षे। एतेषां कोषाणाम् अभावे तु अपेक्षित-सपर्याय-वैदिकशब्दानां ज्ञानं कथं सम्भवेत् ?

मम तु इयं महती उत्कटेच्छा वरीवर्त्ति यत् अहं वैदिकभाषायां तथा अधिकारं प्राप्नुयां यथा संस्कृतभाषायम् इव वैदिकभाषायाम् अपि स्वीयान् मनोभावात् अभिव्यक्तान् कर्त्तुं शक्नुयाम्। इयत् एव नहि, अपितु वैदिकभाषायाम् संस्कृतभाषायाम् एव गद्ये निबन्धान् पत्राणि कथाः उपन्यासान् , नाटकानि पद्ये च काव्यानि रचयितुं प्रभवेयम् । परन्तु एतत् सर्वं तदा एव सम्भवति, यदा वैदिकभाषायां मम सर्वतोमुखी अधिकारः स्यात् । अतः एव अहं वैदिकभाषां शिक्षितुम् उपरि चर्चितं वैदिकव्याकरणं तथा वैदिकशब्दकोषान् समवाप्तुम् इच्छामि । वैदिकभाषां शिक्षित्वा एव अहं वेदमन्त्राणां  वास्तविकम् अर्थं ज्ञातुं शक्ष्यामि। वैदिकभाषायाः ज्ञानं विना तु वैदिकविषयाणां वैदिकानुसन्धानानां च वार्त्ताकरणम् अहं शशशृङ्गान्वेषणम् एव मन्ये ।

आम्, मम पूज्य-पितृचरणानां महामहिम-राष्ट्रपति-सम्मानितानां म.म. पण्डित श्रीनवलकिशोर-काङ्कर-महानुभावानां वैदिक-भाषायाम् अवश्यं पूर्णाधिकारःअवर्तत। अत एव ते ऋषियुगस्य महतः अन्तरालात् अनन्तरं वैदिकभाषायां वैदिकच्छन्दःसु च एव नूतनम् एकं वेदं रचितवन्तः, यस्य नाम

'राष्ट्रवेदः' इति विद्यते । अस्य काङ्कारार्षेय-भाष्यम् अपि ते स्वयम्  एव च लिखितवन्तः । संस्कृत-हिन्द्यग्रेज्यनुवाद-सहितः एषः प्रकाशितः उपलभ्यते अपि । प्रकाशिका अस्ति-श्रीमती शान्तिदेवी, विद्यावैभव-भवन, २९ केसर-विहार, जगतपुरा, जयपुर ३०२०१७ (राजस्थान), मूल्यम् ३०० रू.

पूज्याः पितृपादाः स्वयं वैदिकभाषया रचनां कर्त्तुं सिद्धहस्ताः आसन् इति तु तेषां 'राष्ट्रवेदः' प्रमाणयति एव । वैदिकभाषया भाषणं दातुं कस्मिंश्चिद अपि वैदिकसम्मेलने तेभ्यः अवसरः एव नैव दत्तः । ते प्रकामं कामयन्ति स्म यत् अहं वैदिक-विद्वद्भिः सह वैदिकभाषया एव सम्भाषणं कुर्याम् । किन्तु खेदः अस्ति यत् ईदृशः कश्चित् वैदिकः विद्वान् नैव मिलितः यः तैः सह वैदिकभाषया सम्भाषणं कर्त्तुं शक्नुयात् । तेषाम् यः तैः सह वैदिकभाषया सम्भाषणं कर्त्तुं शक्नुयात् । तेषाम् इयं मनः कामना तेषां जीवने तु नैव प्रपूर्णा अभूत् । परन्तु साम्प्रतं देवलोके देवसभायां सुधर्मायां विराजमानाः ते अवश्यं प्रसीदेयुः स्वकीयाः शुभाशिषः अपि अवश्यं प्रदद्युः यदि इदानीन् अपि कश्चन वैदिकविद्वान् वैदिकभाषया रचनाकरणस्य, सम्भाषणस्य, मञ्चे भाषणकरणस्य च कलायाः प्रदर्शनं कृत्वा जनानाम् आदर्शः भवेत् ।

मम इदं दुर्भाग्यः स्थितः यत् अहं पूज्य-पितृपादभ्यः तेषां जीवनकाले वैदिकभाषां शिक्षितु ध्यानं नैव दत्तवान् । एतद्-विषयकः पश्चात्तापः मम जन्म-जन्मान्तरेषु अपि स्थास्यति, यदि साम्प्रपतम् अपि अहं स्वप्रयासेन वैदिकभाषाम् अस्मिन् जन्मनि न शिक्षेय ।

मह्यं तु स्वापेक्षिताः वैदिकव्याकरणसहिताः पद्यबद्धवैदिकशब्दकोषाः एव अपेक्षिताः सन्ति। पुनः अस्याः भाषायाः शिक्षकः मिलेत् वा न मिलेत् , अहं स्वयम् एव वैदिकभाषां शिक्षिष्ये, अन्यान् अपि शिशिक्षन् निःशुल्कम् एव शिक्षयिस्यामि-अयम् अस्ति मे सुदृढ विश्वासः ।

साम्प्रतं सुरभारती-सेवकाः विद्वद्भिभूतयः एव मह्यं मार्गं निर्देष्टुं कृपां कुर्वन्तु यत् अहं कस्याः व्यक्तेः कस्माद् वैदिकव्याकरणपुस्तकाद् वैदिकशब्दकोषात् च वैदिकभाषां शिक्षेय? तेषां दृष्टौ यदि उपरि दिशा प्रदर्शितं वैदिकव्याकरणं वैदिक शब्दकोषपुस्तकं च उपलभ्यं वर्तते तर्हि तदीयं नाम, लेखकस्य नाम, पुस्तकप्राप्तिस्थानं च सुस्पष्टं शीघ्रातिशीघ्रम् एव मां सूचयितुं कष्टं कुर्वन्तु इति वैदिकभाषा-शिशिक्षुः विद्वद्-विधेयः विनयावनतः।